श्रीकिरातशास्तुः अष्टोत्तरशतनामस्तोत्रम्

{॥ श्रीकिरातशास्तुः अष्टोत्तरशतनामस्तोत्रम् ॥}

किरातात्मा शिवः शान्त शिवात्मा शिवनन्दनः ।

पुराणपुरुषोधन्वी पुरुहुत सहायकृत् ॥ १

नीलाम्बरो महाबाहुर्वीर्यवान् विजयप्रदः ।

विधुमौलि र्विराडात्मा विश्वात्मा वीर्यमोहनः ॥ २

वरदो वामदेवश्च वासुदेवप्रियो विभुः ।

केयूरवान् पिञ्छमौलिः पिङ्गलाक्षः कृपाणवान् ॥ ३

शास्वतः शरकोदण्डी शरणागतवत्सलः ।

श्यामलाङ्गः शरधीमान् शरदिन्दु निभाननः ॥ ४

पीनकन्ठो विरूपाक्षः क्षुद्रहा क्षुरिकायुधः ।

धाराधर वपुर्धीमान् सत्यसन्धः प्रतापवान् ॥ ५

कैरातपतिराखेटप्रियः प्रीतिप्रदः प्रभुः ।

रेणुकात्मज श्रीराम चित्तपत्मालयो बली ॥ ६

व्याधरूपधरो व्याधिनाशनः कालशासनः ।

कामदेवसमो देवः कामितार्थ फलप्रदः ॥ ७

अभृतः स्वभृतो धीरः सारः सात्विकसत्तमः ।

सामवेदप्रियो वेधाः वेदो वेदविदांवरः ॥ ८

त्र्यक्षरात्मा त्रिलोकेशः त्रिस्वरात्मा त्रिलोचनः ।

त्रिगुणात्मा त्रिकालज्ञः त्रिमूर्त्यात्मा त्रिवर्गदः ॥ ९

पार्वतीनन्दनः श्रीमान् पावनः पापनाशनः ।

पारावारगभीरात्मा परमात्मा परात्परः ॥ १०

गीतप्रियो गीतकीर्तिः कार्तिकेयसहोदरः ।

कारुण्यसागरो हंसः सिद्ध सिम्हपराक्रमः ॥ ११

सुश्लोकः सुमुखो वीरः सुन्दरः सुरवन्दितः ।

सुरवैरिकुलध्वंसी स्थूलश्मश्रुरमित्रहा ॥ १२

अमृतः सर्वगः सूक्ष्म स्थूलस्तुरगवाहनः ।

अमलो विमलो दक्षो वसुमान् वनगो गुरुः ॥ १३

सर्वप्रियः सर्वसाक्षी सर्वयोगीश्वरेश्वरः

तारक ब्रह्मरूपी च चन्द्रिकाविशदस्मितः

किरात वपुरारामसञ्चारी परमेश्वरः ॥ १४

इति श्री किरातशास्तुः अष्टोत्तरशतनामस्तोत्रं सम्पूर्णं ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

Kirata Shastu Ashtottara Shatanama Stotram Lyrics in Devanagari PDF
% File name : kiraata108stotra.itx
% Category : aShTottarashatanAma
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : Hinduism/religion/traditional
% Transliterated by : Antaratma antaratma at Safe-mail.net
% Proofread by : Antaratma antaratma at Safe-mail.net
% Latest update : April 17, 2007
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [December 15, 2015] at Stotram Website